
॥ श्रीसरस्वती-ध्यानम् ॥
ॐ सरस्वतीं सत्यवासां सुधांशु-समविग्रहां
स्फटिकाक्षस्रजं पद्मं पुस्तकं च शुकं करैः।
चतुर्भिर्दधतीं देवीं चन्द्रबिम्ब-समाननां
वल्लभामखिलार्थानां वल्लकी-वादन-प्रियाम्॥
भारतीं भावये देवीं भाषाणामधि-देवताम्।
भावितां हृदये सद्भिः भामिनीं परमेष्ठिनः॥
चतुर्भुजां चन्द्रवर्णां चतुरानन-वल्लभाम्।
आवाहयामि वाणि त्वामाश्रितार्थ-प्रदायिनीम्॥



## ॥ प्रार्थना-प्रणतिः ॥

सरस्वति नमस्तुभ्यं वरदे काम रूपिणि।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा॥

वन्दे सर्व-सुरादिभिर्निगदितां लोक-प्रसिद्धां प्रभां
शुभ्रां शास्त्र-पुराण-नाटक-महाकाव्यादि-सञ्चारिणीम्।
ब्रह्मादि-त्रि-दशैरनिन्दित-गुणैरावेष्टितां सर्वदा
नाना-भूषण-भूषितां नतजनाभीष्ट-प्रदां भारतीम्॥

दोर्भिर्युक्ता चतुर्भिः स्फटिक-मणिमयीमक्ष-मालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण।
भासा कुन्देन्दु-शङ्खस्फटिकमणि-निभा भासमानाऽसमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना॥

पाशाङ्कुश-धरा वाणी वीणा-पुस्तक-धारिणी।
मम वक्त्रे वसेन्नित्यं सन्तुष्टा सर्वदा शिवा॥

चतुर्दशसु विद्यासु रमते या सरस्वती।
सा देवी कृपया युक्ता जिह्वासिद्धिं करोतु मे॥

देहि देवि कलादाक्ष्यं वाणि वाक्पटुतां दिश।
सरस्वति सुतान् रक्ष कले पालय मे कुलम्॥

पाहि मां पावने देवि रक्ष राक्षसनाशिनि।
अव मामम्बुजावासे त्राहि मां तुहिनप्रदे॥

पाहि पाहि जगद्वन्द्ये नमस्ते भक्तवत्सले।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः॥